# बृहदारण्यकोपनिषद्यात्मतत्त्वनिरूपणम्

प्रो. पारसनाथ द्विवेदी

ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः।।

## बृहदारण्यकोपनिषच्छब्दार्थनिरूपणम्

शुक्लयजुर्वेदे काण्वमाध्यंदिनभेदेन शाखाद्वयं ब्राह्मणञ्च शतपथाख्यम्। तत्र शतं पन्थानोऽध्याया यत्र तद् शतपथमिति। तत्र काण्वशतपथब्राह्मणे चतुर्दशकाण्डानि। अन्तिमे काण्डे चतुर्दशे अष्टौ अध्यायाः सन्ति। तत्रादिद्वयं ज्योतिष्टोमाङ्गभूतस्य प्रवर्ग्य कर्मणः प्रतिपादकम्। अत एव तद्द्वयं प्रवर्ग्यकाण्डमिति वैदिकेषु प्रसिद्धम्।

चतुर्दश काण्डस्यावशिष्टाः षडध्यायाः वृहदारण्यकोपनिषच्छब्देनाभिधीयन्ते। षट्ष्वेवाध्यायेषु भगवत्पादैर्भाष्यमभाषि। आद्यमध्यायद्वयञ्च कर्मसम्बन्धीति परित्यक्तम्। भाष्यस्य प्रारम्भ एव भगवत्पादैरुक्तम् "सेयं षडध्यायीति"।

शब्दतोऽर्थतश्च बृहत्त्वात् बृहद् इति, अरण्ये उपदिष्टत्वाच्चारण्यकमिति ब्रह्मविद्यास्वरूपत्वादुपनिषदिति बृहदारण्यकोपनिषदुच्यते। तदुक्तं भाष्यकारैः प्रारम्भ एव–"सेयं ब्रह्मविद्योपनिषच्छब्दवाच्या तत्पराणां सहेतोः संसारस्यात्यन्तावसादनाद् उपनिपूर्वस्य सदेस्तदर्थत्वात्। तादर्थ्याद् ग्रन्थोऽपि उपनिषद् उच्यते। सेयं षडध्यायी अरण्ये अनूच्यमानत्वाद् आरण्यकम्। बृहत्त्वात्परिमाणतो बृहदारण्यकम्।। (बृ.भा.पृ.-1)

भाष्यकारीया काण्वशाखा शतपथब्राह्मणस्य। अतो विशेषरूपेणास्या उपनिषदो व्याख्याञ्चकार भाष्यकारः।

बृहदारण्यकं काण्डत्रयात्मकम्। प्रथमं मधुकाण्डम्, द्वितीयं मुनिकाण्डं, तृतीयं खिलकाण्डमिति। आदितोऽध्यायद्वयं मधुकाण्डमागमप्रधानम्। द्वितीयमध्यायद्वयं याज्ञवल्क्यकाण्डं मुनिकाण्डं, उपपत्तिप्रधानं वादजल्पकथां प्रवृत्य प्रवर्तमानत्वात्। तृतीयमध्यायद्वयविविधोपासनाप्रधानं खिलकाण्डं परिशिष्टकाण्डं वा व्यपदिश्यते। कर्मोपासनाब्रह्मकाण्डेषु त्रिष्वपि यद् यावद् वक्तव्यमवशिष्टं तस्य सर्वस्याभिधानेन प्रकीर्णरूपत्वं खिलत्वम् उच्यते।

तत्र ब्रह्मविद्योपनिषदुच्यत इत्युक्तम्। किञ्च ब्रह्म, किं प्रत्यगामा तद्भिन्नोऽभिन्नो वा प्रपञ्चश्च परमात्मभिन्नोऽभिन्नो वा सत्यो मिथ्या वेत्यादि विचारोऽस्मिन् निबन्धे प्रक्रान्तः ब्रह्मस्वरूपावगत्यनन्तरमेव तत्प्राप्त्युपाय इति तत्स्वरूपमेव प्रथममुच्यते प्रतिकाण्डम्।

## ब्रह्मणः सर्वान्तरात्मत्वम्

तत्र प्रथमं मधुकाण्डे सप्तमो मन्त्रः "तद्धेदं तर्ह्यव्याकृतमासीत् तन्नाम रूपाभ्यामेव व्याक्रियतासौ नामायमिदं रूप इति तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौ नामायमिंद रूप इति। स एव इह प्रविष्टः। आनखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवाहितः स्याद्। विश्वंभरो वा विश्वंभरकुलाये तं न पश्यन्ति। अकृत्स्नो हि स प्राणन्नेव प्राणो नाम भवति। वदन् वाक्, पश्यँश्चक्षुः, शृण्वन् श्रोत्रं, मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव। स योऽत एकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोऽत एकैकेन भवति। आत्मेत्येवोपासीतात्र ह्येते सर्वे एकं भवति तदेतत् पदनीयमस्य सर्वस्य यदयमात्मा अनेन ह्येतत् सर्वं वेद। यथा ह वै पदेनानुविन्देदेवं कीर्तिं श्लोकं य एवं वेद" ।। बृ.1/4/7।।

अनेन मन्त्रेणात्मनः सर्वजगदुपादाननिमित्तत्वरूपं तटस्थं लक्षणं सर्वान्तरत्वप्रत्यगात्माभिन्नरूपत्वाद्युक्तं भवति। तथाहि–इदं नामरूपव्याकृतं साध्यसाधनलक्षणं प्रत्यक्षादिप्रमाणसंनिधापितं जगद् उत्पत्तेः पूर्वमव्याकृतं नामरूपाभ्यामासीत्। तदेवाव्याकृतं नामरूपाभ्यां व्याकृतम्। अनेन असत उत्पत्तिर्वारिता सतश्च कार्यस्य विनाशो वारितः। कारणस्याव्याकृतस्य अवस्थान्तरं नाम कार्यमिति।

यद्यपि व्याक्रियतेति कर्मकर्तरि क्रिया प्रयुक्ता। तथापि कर्तारं विनानुपपद्यमानया क्रिययैव व्याकरणात्मिकया नियामकः कर्ताऽऽक्षिप्यते। न हि अकर्तृकं व्याकरणमतिप्रसङ्गात्। व्याकरणस्य च प्रतिनियतदेशकालफलाश्रयत्वात्। सोऽसौ कः कर्ता नियन्तेति जिज्ञासायामुच्यते। यदर्थः सर्वशास्त्रारम्भो, यस्मिन्नविद्यया स्वाभाविक्या कर्तृक्रियाफलाध्यारोपणा कृता, यः कारणं सर्वस्य जगतो, यदात्मके नामरूपे सलिलादिव स्वच्छान्मलमिव फेनम् अव्याकृते व्याक्रियते, यश्च ताभ्यां नामरूपाभ्यां विलक्षणः स्वतो नित्यशुद्धबुद्धमुक्तस्वभावः स एषोऽव्याकृते आत्मभूते नामरूपे व्याकुर्वन् ब्रह्मादिस्तम्बपर्यन्तेषु देहेष्विह कर्मफलाश्रयेषु अशनायादिमत्सु प्रविष्टः।

अव्याकृतमासीदित्यनेन न केवलमनाद्यनिर्वचनीय भावरूपाविद्यैवोच्यते अपि तु तदात्मत्वेन परमात्माऽपि अव्याकृत शब्देनाभिहितः। व्याकृताव्याकृतयोः परमात्मव्यतिरेकेणाभावाद् तदात्मत्वं न तु तद्रूपत्वमेव। अनेक क्रियाकारकादिविशेषवद् व्याकृतं तथा अविशेषवदव्याकृतं, तदुभयोपादानभूतं तद्विलक्षणं ब्रह्म। न हि अधिष्ठानव्यतिरेकेण आरोपितस्योपलब्धिः सत्ता वा सम्भवति।

तत्र व्याकृते प्रवेशश्च तत्रोपलभ्यत्वरूपः न तु अन्यः कश्चित् प्रकारः संभवति। प्रवेशव्याख्याने भाष्यकारैः सर्वेषां पक्षाणां समाधानं कृत्वा व्यापकस्य पर ब्रह्मणः तत्रोपलब्धत्वरूप एव प्रवेशः प्रतिपादितः न चासौ तत्स्थ एव धर्मान्तरेण जायते, अनित्यत्वापत्तेः। न च द्रव्ये गुणप्रवेशवत्, अनाश्रितत्वात्तस्य। नापि फले बीजवद्, विनाशिधर्मवत्त्वप्रसङ्गात्। तस्माद व्याकृताव्याकृतयोरन्तः प्रवेशात्तस्य सर्वान्तरत्वसिद्धिः।

## जीवब्रह्मणोरैक्यसिद्धिः

अत्रेदं शङ्कते नामरूपात्मकजगत्प्रवेशात् परस्य ब्रह्मणः संसारित्वसुखित्वदुःखित्वादिप्रसक्तिः स्यात्। ततश्च अजमजरममरमित्यादि (नृसिंह. 2) श्रुतिविरोधः स्यात्। नादत्ते कस्याचित् पापं न चैवं सुकृतं विभुः (गी. 5/15) इत्यादिस्मृतिविरोधः स्यात्। अतः अनय एव कश्चिद् संसारी जीवात्मा प्रविष्टः भोगभाग् इति युक्तमिति चेत् न, एकस्यैव परात्मनः प्रवेशात्। बहुतरश्रुतिस्मृतिभिरनुरोधाच्च। तथाहि–सेयं देवतैक्षत... नामरूपे व्याकरवाणीति (छा. 6/3/2)। तथा–तत् सृष्ट्वा तदेवानु प्राविशत् (तै. 2/6)। स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत (ऐ. 3/12)। रूपं रूपं प्रतिरूपो बभूव (कठो. 2/2/10) इत्याद्याः श्रुतयः। क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत (गी. 3/2) इत्याद्याः स्मृतयश्च परस्यैवात्मनः प्रवेशं निर्धारयन्ति।

न च प्रविष्टस्य परात्मन इतरेतरभेदोऽपि सम्भवति। एको देवो बहुधा संनिविष्टः (श्वे. 6/11)। त्वमेकोऽसि बहूननुप्रविष्टः।। एकोदेव सर्वभूतेषु गूढ़ः सर्वव्यापी सर्वभूतान्तरात्मा (श्वे. 6/11) इत्यादि श्रुतिभ्यः। पितामहस्य जगतो माता धाता पितामहः (गी. 9/17) इत्यादिस्मृतिभ्यश्च।

अतः एकस्यैव परमात्मनः प्रवेशः। न च तस्य संसारित्वादिप्रसक्तिः तस्यासङ्गात्। असङ्गोऽयमुच्यत् इति श्रुतेः। असङ्गः सन् कथं प्रविष्टः, न प्रविष्टोऽपि तु प्रविष्ट इव लक्ष्यते।

न चान्यः कश्चित् प्रविष्टः संसारी, अन्यस्य कस्यचित् चेतनस्य जीवस्य निषेधात्। नान्योऽतोऽस्ति द्रष्ट्र श्रोतृ मन्तृ विज्ञात्रेत्यादि श्रुतेः (छा. 6/8/7)।

अतः परमात्मैव नामरूपव्याकृतदेहादौ प्रविष्ट इव जीवभावेन व्यपदिश्यते। जलादिप्रतिबिम्बवदात्मप्रवेशः। भेददर्शनापवादाच्च सृष्टि वाक्यानामप्यात्मैक्य एव तात्पर्यमास्थेयम्। तस्मादनेनमन्त्रेण जीवात्मपरमात्मनोऽभेद उक्तः।

तस्य देहादौ प्रविष्टस्यात्मनः प्राणचक्षुः श्रोत्रादि रूपेणैकैकमुपासनं सदोषम्। एकैकोपासने न कृत्स्नात्मोपासनं भवति। अतः प्राणाद्यनुगतरूपेण आत्मेत्युपासीत। प्राणाद्युपाधिविशेष क्रियाप्राणनादि व्याप्रोतीव यः आत्मा स उपासनीयः। अस्मिन्नेवात्मनि निरुपाधिके शुद्धबुद्धस्वरूपे प्राणाद्युपाधिकृता विशेषा एकतामभिन्नतां प्रतिपद्यन्ते। अतः स कृत्स्नात्मोपासको भवति।

आत्मेत्येवोपासीतेत्यत्र उपासनं ज्ञानमेव। अतो न विधिः ज्ञानस्य प्रमाणतन्त्रत्वात् विधातुमशक्यत्वात्। अत्र प्रसङ्गे भाष्ये विस्तरेण ज्ञानस्य विधित्वनिरासः कृतो वेदितव्यः। आत्मेत्युपासीतेत्यत्र आत्मशब्दस्येति परप्रयोगाद् आत्मतत्त्वस्य वस्तुत आत्मशब्दप्रत्यययोरविषयत्वं बोध्यते। अन्यथात्मानमुपासीतेत्येवावक्ष्यत्। अतः, नेति नेति (बृ. 2/3/6), विज्ञातारमरे केन विजानीयाद् (बृ. 2/4/14), अविज्ञातो विज्ञाता (बृ. 3/7/23), यतो वाचो निवर्त्तन्ते (तै. 2/4/1) इत्यादि श्रुतयः संगता भवन्ति। आत्मानमेव लोकमुपासीतेत्यादिवाक्यं तु अनात्मोपासननिवृत्तिपरमिति न दोषः।

अनिर्ज्ञातत्वेऽपि आत्मैव ज्ञातव्यो द्रष्टव्यः नानात्मा, यत एतदेवात्मतत्त्वं पदनीयं गमनीयं ज्ञातव्यम्। नान्यदस्तीति। अस्मिन्नेव निर्ज्ञाते सर्वमन्यद् विज्ञातं भवतीति प्रतिज्ञापि संगता भवति।

एतदेवात्मतत्त्वं पुत्रवित्तादिभ्यो प्रेयः अत एवेदं पदनीयम् इति "तदेव प्रेयः पुत्रात् प्रेयः वित्तात्प्रेयः।" इत्यादितत्त्वमुक्तमष्टमेन मन्त्रेण। मैत्रेयी ब्राह्मणेऽपि आत्मनस्तु कामाय सर्वं प्रियं भवतीत्युक्तम्। आत्मनः प्रियत्व एव सर्वत्र प्रियता न तु आत्मव्यतिरिक्तं किञ्चित् प्रियमित्यनात्मनि वैराग्यं करणीयम्।

आत्मेत्युपासीतेति विद्यासूत्रम्। आत्मैव द्रष्टव्यः नान्यत्, सः पदनीयः पुत्रादिभ्यः प्रेयः। एषा आत्मविद्या ब्रह्मविद्या तथा ब्रह्मविद्यया ब्रह्मैव सर्वं सर्वोपादानत्वात् जड़प्रपञ्चस्तु उपादेयो मिथ्यैवेति सर्वभाव उपपद्यते अतः श्रुतिः प्राह–तदाहुर्यद् ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यते किमु तद् ब्रह्मावेद यस्मात् तत् सर्वमभवत् (बृ.1/4/9)।

ब्रह्म वा इदमग्र आसीद् तदात्मानमेवावेत्। अहं ब्रह्मास्मीति। तस्मात् तत् सर्वमभवत्....(बृ. 1/4/10)।

अनेन मन्त्रेण जीवब्रह्मणोरद्वैतं प्रतिपादितम्। तथाहि–अपरं ब्रह्म सोपहितं हिरण्यगर्भाख्यं अग्रे व्याकरणात् पूर्वमासीत्। परब्रह्मग्रहणे सर्वभावापत्तेर्विद्यानपेक्षत्वात्। तद् हिरण्यगर्भाख्यं ब्रह्म अनाद्यविद्याव्याकृतोपाधि आत्मानमेव ज्ञातवान् अहं ब्रह्मास्मीति। एवं ब्रह्मविद्यया तत् हिरण्यगर्भः सर्वं सर्वरूपोऽभवत्। एवं देवानां महर्षीणाञ्च य एवमबुध्यत स तदभवत्। यथा वामदेवो महर्षिः एतद् विद्यावान् प्रपेदे अहं मनुरभवमहं सूर्यश्चेति। इदानीं कालेऽपि य एवदेवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति। न तस्य पराभवं देवा अपि कर्तुं पारयन्ति। स देवानामात्मा भवति।

एवं मन्त्रार्थेन स्पष्टमेव जीवब्रह्मणोरद्वैतं प्रतिपादितम्। अत्र अहं पदेन प्रथमो जीव हिरण्यगर्भः ब्रह्मशब्देन च नित्यशुद्धबुद्धमुक्तस्वरूपः परमात्मा गृह्यते। सर्वभावापत्तिवर्णनाद्। इयमेव ब्रह्मविद्या अहं ब्रह्मास्मीत्यखण्डाकारवृत्तिरूपा यया अन्यत्व बुद्धिः निवर्तिता भवति। सर्वभावापत्तिरेव विद्याफलम्।

विद्या अविद्यानिवर्त्तिका। केयमविद्येत्यत आह श्रुतिः–"अथ योऽन्यां देवतामुपास्ते अन्योऽसौ अन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम्"। (बृ. 1/4/10)। अनेन मन्त्रेण जीवब्रह्मणोर्भेदापादकमज्ञानमेवाविद्येति ज्ञायते। सा चाविद्या अनादिसिद्धा न तस्याः कर्ता कश्चित्। अब्रह्मत्वमसर्वत्वञ्चाविद्याकृतमेवास्ति। सा चापरमार्थभूतैव अन्यथा विद्यया निवृत्तिस्तस्या न स्यात्। न हि पारमार्थिकं वस्तु कर्तुं निर्वतयितुं वार्हति ब्रह्मविद्या।

कथं साक्षादपरोक्षे स्वप्रकाशे ब्रह्मणि अब्रह्मासर्वत्वापादिका तद्विरोधिनी अविद्या तिष्ठेत्। नहि प्रकाशे तमस्तिष्ठति। न च ब्रह्मातिरिक्तः कश्चिदन्य आत्मा चेतनः पारमार्थिकोऽस्तीति चेन्न ब्रह्मणि विद्याविधानात्। यदि ब्रह्मणि अविद्या न स्यात् तर्हि सदेवेदं (छा. 6/2/1), ब्रह्मैवेदं सर्वम् (मु. 2/2/11), आत्मैवेदं सर्वम् (छा. 7/25/2) इत्यादि ब्रह्मण्येकत्व विधानं श्रुतेर्व्यर्थं स्यात्। तस्मात् ब्रह्मण्येवाविद्या अध्यारोपिता कल्प्यते। तस्मात् स्वरूपावगतेः पूर्वमात्मन्येवाविद्या तदपगमनाय च सर्वं शास्त्रमर्थवद्। अपगतायां च तस्यां शास्त्रानर्थक्यं तु सर्वदर्शनसम्मतम्। न हि मुक्तात्मनि शास्त्रं सार्थकं कस्यचिन्मते। त्रयोदशाध्याये गीताभाष्येऽपि क्षेत्रज्ञनिरूपणावसरे भाष्यकारैरेतत् सर्वं सम्यक् प्रतिपादितम्। तत्र हि अविद्यावद्विषयत्वं शास्त्रस्य प्रतिपाद्य मोक्षे तद्वैयर्थ्यमुक्तम्।

जीवब्रह्मणोरज्ञानकृते भेदे व्यावहारिके सति कर्मिण उपासकस्य मुमुक्षोश्च गतिमार्गविशेषोपदेशः सार्थकः। वस्तुतस्तु जीवब्रह्मणो न भेदः। अयमात्मा ब्रह्म (बृ. 2/5/19)। यत् साक्षादपरोक्षाद् ब्रह्म य आत्मा (बृ. 3/4/11), तत् सत्यं स आत्मा (छा. 6/9/4), ब्रह्मविद् आप्नोति परम् (तै. 2/5/19) इत्याद्याः श्रुतयः प्रमाणम्। जीवब्रह्मणोरेकत्वादेव न जीवात्मनः ब्रह्मसम्पदुपपत्तिः। भेदे सति हीनोऽधिकं सम्पद्यते। अभेदे तु केन कः सम्पद्येत। ब्रह्मवेद ब्रह्मैव भवति (मु. 2/2/9)। अभयं वै जनक प्राप्तोऽसि (बृ. 4/2/4), अभयं हि वै ब्रह्म भवति इत्यादि श्रुतिभ्यः ब्रह्मप्राप्तिरेवाभिधीयते न सम्पत्तिः सम्पत्तिश्चेदापत्तिर्नस्यात्। आपत्तिर्नाम तद्रूपत्वाधिगतिः। अतः सर्वशाखोपनिषत्सु ब्रह्मैकत्वविज्ञानं निश्चितोऽर्थः। एवं हि प्रथमाध्यायस्य दशमे एकादशे च ब्राह्मणे जीवब्रह्मणोरैक्यमुपदिष्टं विस्तरेण च भाष्ये प्रतिपादितम्। विस्तरभयान्नेहोपन्यस्तम्। मधुकाण्डे द्वितीयाध्यायेऽपि दृप्तवालाक्यजातशत्रुसंवादे शरीरेन्द्रियादिभ्यः पृथग् आत्मतत्त्वोपदेशो दृश्यते। आदित्यादिपुरुषेषु ब्रह्मत्वबुद्धिरुपासनार्थेति प्रदर्श्य अजातशत्रुः दृप्तवालाकिं सुप्तपुरुषमुद्दिश्यात्मतत्त्वमुपदिष्टवान्। आदित्यादिपुरुषेभ्यो विलक्षणो विज्ञानमयः पुरुष आत्मा। विज्ञानमन्तःकरणं बुद्धिरुच्यते तन्मयस्तत्प्रायः विज्ञानमयः पुरुषः। तत् प्रायत्वं नाम तस्मिन्नन्तः करणे उपलभ्यत्वम्। प्राचुर्ये मयट् न तु विकारार्थे। पुरिशयनात् पुरुष इति। एवं स वा अयमात्मा विज्ञानमय मनोमय इत्यादावपि वाक्ये द्रष्टव्यम्।

स च विज्ञानमय आत्मा एषां प्राणानामिन्द्रियादीनां विज्ञानं स्वस्वविषयविज्ञानसामर्थ्यमादाय विज्ञानेन अन्तःकरणगताभिव्यक्तिविशेषविज्ञानेन उपाधिस्वभावजनितेन गृहीत्वा हृदयाकाशे परमात्मनि सुप्तो वर्तते। तस्य स्वपिति नाम। स्वमपीतो भवति। सतासोम्य तदा सम्पन्नो भवतीति (छा. 6/8/1) श्रुतेः। लिङ्गोपाधिसम्बन्ध-विशेषात्मस्वरूपं जाग्रत्स्वप्नसिद्धमुत्सृज्यं स्वाभाविके आत्मनि केवले वर्तते। अनेन जीवब्रह्मणोरैक्यं प्रतिपादितम्।

तत्रत्यं भाष्यम्–"तत्र बुद्धेरन्तःकरणस्य हृदयं स्थानम्। तत्रस्थबुद्धितन्त्राणि चेतराणि बाह्यानि करणानि। तेन बुद्धिः कर्मवशात् श्रोत्रादीनि ताभिर्नाडीभिः (हिताख्याभिः) मत्स्यजालवद् कर्णशष्कुल्यादिस्थानेभ्यः प्रसारयति, प्रसार्य चाधितिष्ठति जागरितकाले तां विज्ञानमयोऽभिव्यक्तस्वात्मचैतन्यावभासतया व्याप्नोति। संकोचनकाले च तस्या अनुसंकुचति। सोऽस्य विज्ञानमयस्य स्वापः। जाग्रद्विकासानुभवो भोगः। बुद्ध्युपाधिस्वभावानुविधायी हि स चन्द्रादिप्रतिविम्ब इव जलाद्यनुविधायी। तस्मात् तस्या बुद्धेर्जाग्रद् विषयायास्ताभिर्नाडीभिः प्रत्यवसर्पणमनुप्रत्यवसृप्य पुरीतति शरीरे शेते तिष्ठति"। सा सुषुप्तिः सर्वसंसारदुःखवियुक्तावस्था। स च विज्ञानमयश्चिद्रूपः प्राणादीनामपि सत्यानां सत्यं परमार्थभूतमिति। (बृ. 2/1/19)

ननु संसारिंणोजीवस्यान्यस्यैवावस्थावर्णिता, ब्रह्म त्वन्यत् असंसारीति चेन्न ब्रह्म त्वे ब्रवाणीति उपक्रम्य एषोऽन्तर्हृदयाकाशे शेते इति विधानात्। उपक्रमे यद् ब्रह्म प्रकृतं तदेव आत्मप्रतिपादनेनोपसंहृतम्। तदेव ब्रह्मात्मेति श्रुत्यर्थः सम्पद्यते। न चासंसारि ब्रह्म संसार्यात्मतत्त्वेन चिन्तयेत् अग्निमिव शीतत्वेनाकाशमिव मूर्तत्वेन। न चैतत् प्रतिपादनमर्थवादः मन्त्रब्राह्मणवादेभ्यः तस्यैव परात्मनः प्रवेशश्रवणात्। पुरः पुरुष आविशत् (बृ. 2/5/18), रूपं रूपं प्रति रूपो बभूव (क. 2/2/9)। इत्यादि श्रुतिभिः सृष्टिकर्तुरेव असंसारिणः शरीरप्रवेशः श्रूयते। तस्माद् जीवब्रह्मणोरैक्यं सिध्यति।

ननु अग्निविस्फुल्लिङ्गदृष्टान्तेन अंशांशिभाव एव जीवात्मपरमात्मनो युक्त इति चेन्न अंशोऽवयवः, अंशी अवयवी, एवञ्च ब्रह्मणः सावयवत्वापत्तिः स्यात् सावयवत्वेन विकारापत्तिः। तथा च "निष्कलं निष्क्रियं शान्तमित्याद्याः" (श्वे. 6/19) श्रुतयो विरुध्येरन्। यत्रापि अंशांशिभाव उक्तः तत्र सर्वत्रापि अंश इवांशः कल्प्यः। न तु परमार्थः तथा। व्युत्पादितश्चैतत् अंशो नाना व्यपदेशादिति (ब्र.सू. 2/3/43) सूत्रेभाष्ये। इहापि च भाष्ये व्याख्यातम्। तस्माद् उपाधिभेदादेव जीवात्मनि ब्रह्मांशत्वव्यपदेशः। अग्नि विस्फुल्लिङ्ग दृष्टान्तोऽपि एकात्मप्रत्ययार्थमेवोपादीयते। यथाग्नौ तथा तत्स्फुल्लिङ्गेऽपि एकाग्नित्वबुद्धिरिति। तथा च सर्वोपनिषत्सु विज्ञानात्मपरमात्मनोरेकत्व प्रत्ययो विज्ञायत इत्यत्र नास्ति विप्रतिपत्तिः।

नामरूपोपाधिनिमित्त एवात्मनि असंसारिणि सर्वे संसारित्वादिव्यवहाराः कल्पिता ध्यायतीव लेलायतीव (बृ. 4/3/7)। न कर्मणा वर्धते नोकनीयान्। न कर्मणा लिप्यते पापकेन। समं सर्वेषु भूतेषु तिष्ठन्तम् (गी. 13/27) इत्यादि श्रुतिस्मृतिवादेभ्यः।

द्वितीयाध्यायस्य चतुर्थे ब्राह्मणेऽपि जीवात्मानमुद्दिश्य परमात्मोपदेशः जीवभावेन परमात्मन एवावस्थितिरिति प्रतिपादितम्। वाक्यान्वयाधिकरणे ब्रह्मसूत्रेऽपि अवस्थितेरिति काशकृत्स्न (ब्र.सू. 1/4/22) इति सूत्रभाष्ये ब्रह्मण एव जीवभावेनावस्थितिः प्रतिपादिता। मैत्रेयी ब्राह्मणे ब्रह्मविद्याया अङ्गत्वेन सर्वकर्म संन्यासो विधीयते। उद्यास्यन् वा अरेऽहमस्मात् स्थानादस्मीति वचनात्।

तत्रेतर वैराग्यार्थमात्मनः सर्वप्रियत्वं प्रतिपाद्य तस्यैव द्रष्टव्यत्वं तदुपायभूतं श्रवणादि च विधीयते। आत्मविज्ञानेनैव सर्वविज्ञानमित्यादिसर्वं वर्णितम्।

ब्रह्म तं परादाद् योऽन्यत्रात्मनो ब्रह्म वेदेत्यादिवाक्येन च ब्रह्मैकत्वं प्रतिपादितम्। यः खलु ब्राह्मणत्वं क्षत्रियत्वादि च ब्रह्मणो भिन्नं वेद सः ब्राह्मणत्वादिनैव पराभूतो भवति स्वरूपाच्यावितो भवति। अतः, इदं सर्वं यदयमात्मेत्यादि वाक्येन आत्मव्यतिरेकेणेतराभावे दुन्दुभ्यादि दृष्टान्ताः प्रदर्शिताः।

"स यथा सैन्धवखिल्य उदकेप्रास्त उदकमेवानुविलीयेत न हास्योद्ग्रहणाय स्यात्। यतो यतस्त्वाददीत लवणमेवैवं वा अरे इदं महद्भूतमनन्तमपारं विज्ञानघन एव एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्यं संज्ञाऽस्ति।" इत्यादि दृष्टान्तेन उपाधिवशाच्छरीरादिसंघातात्मनावस्थित्य जीवात्मनः ब्रह्मप्राप्तौ सैन्धवघनस्येव खिल्यभावव्यपगतौ ब्रह्मरूपतापत्तिः लवणभावापत्तिरिव। न च ब्रह्मीभूते जीवात्मनि नामरूपादि संज्ञास्ति। एवं जीवात्मपरमात्मनोरैक्यं प्रतिपादितं भवति।

द्वैतञ्चापारमार्थिकमिति तत्रैव प्रतिपादितम्—यत्र द्वैतमिव भवति इतर इतरं जिघ्रतीत्यादिना। द्वैतमिवेत्यत्र इवशब्दाद् द्वैतस्यावस्तुत्वमुच्यते। यत्रास्य सर्वमात्मैवाभूत् केन कं जिघ्रेत्.... विज्ञातारमरे केन विजानीयादित्यादि वाक्येन च स्पष्टमेव आत्मैकत्वं सर्वक्रियाकारकलशून्यमभिहितम्। एवमविद्यावस्थाकृतं द्वैतं भेददृष्टिः। विद्यावस्थायां तु अभेददृष्टिरिति।

द्वितीयाध्यायस्थ पंचमे मधुब्राह्मणेऽपि स्पष्टमेव जीवात्मपरमात्मनोरैक्यमुक्तम्। इयं पृथिवी सर्वेषां भूतानां मधु अस्यै पृथिव्यै सर्वाणि भूतानि मधु। यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषः यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं पुरुषोऽयमेव ब्रह्मेदं सर्वम् (बृ. 2/5/1)। इत्यादि मन्त्रेण पृथिव्यादि सर्वं जगत् परस्परं मधु कार्यं। परस्परमुपकार्योपकारकभावेनावस्थितम्। मधुशब्देन कार्यमुच्यते। यच्च लोके परस्परोपकार्योपकारकभावेन स्थितं तत् एककारणपूर्वकं एकसामान्यात्मकमेकलयञ्च दृष्टमिति, पृथिव्यादि सर्वमपि तथाभवितुमर्हति। तच्च कार्यम्। पृथिव्यादिषु तेजोमयं तेजः स्वरूपममृतमयममृतस्वरूपं ब्रह्मैव तदभिन्नश्चायं शारीर इति प्रतिपादितं भवति।

तस्मिन्नात्मनि एव सर्वमिदं जगज्जातं रथनाभौ अरा इवार्पितमित्यपि तत्रैव प्रतिपादितम्। एवमद्वैते एव मधुकाण्डस्य तात्पर्यमवधार्यते। तृतीयचतुर्थयोरपि अध्याययोः मुनिकाण्डख्ययोः अद्वैते एव तात्पर्यम्। तथाहि जनकसभायां उषस्तचाक्रायणयाज्ञवल्क्य संवादे यत् साक्षादपरोक्षाद् य आत्मासर्वान्तरः तं मे व्याचक्ष्वेति उषस्तेन पृष्टः याज्ञवल्क्यः प्राणापानादिव्यापारवत्प्रत्यगात्मा सर्वान्तर इति ब्रवीति। एवं प्रत्यगात्मैव साक्षादपरोक्षं ब्रह्मेति। स च सर्वान्तर आत्मा न गोघटादिवत् प्रत्यक्षयिनुं शक्यते। न विज्ञातारं विजानीयादितिवाक्यात्। एष ते आत्मा सर्वान्तरोऽतोऽन्यदार्तमित्यनेन च वाक्येन आत्मव्यक्तिरिक्तं सर्वं आर्तं मिथ्येति सिद्धं भवति।

तथा कहोल संवादेऽपि तदेव ब्रह्म साक्षादपरोक्षं व्याख्यातम् अशनायापिपासाद्यतीतः शोकमोहजरानभिप्लुतः सर्वान्तर आत्मैव साक्षाद् ब्रह्म। एतं वै तमात्मानं विदित्वा एषणात्रयं परित्यज्य सर्वकर्मसंन्यासपूर्वकं ब्राह्मणा भैक्ष्याचर्यं चरन्ति।

"तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य वाल्येन तिष्ठासेत्। वाल्यञ्च पाण्डित्यञ्च निर्विद्याथ मुनिरमौनञ्च मौनं च निर्विद्याथ ब्राह्मणः, स ब्राह्मणः केन स्यात् येन स्यात्तेने दृश एवातोऽन्यदार्तम्।" अस्यार्थः, पण्डा शास्त्रजन्याबुद्धिः तद्वान् पण्डित तस्य भावः पाण्डित्यं श्रवणं निःशेषं कृत्वा अनन्तरं बाल्येन बलवत्तया तिष्ठासेत्। बलं ब्रह्मचर्यं मननं विषयानासक्तिर्वा तस्य भावो बाल्यं तेन स्थातुमिच्छेत्। बाल्यं पाण्डित्यं निःशेषेण कृत्वा अथ अनन्तरं मुनिः सततं निदिध्यासनवान् भवेत्। एवं मौनं निदिध्यासनं श्रवणं मननश्च निःशेषेण कृत्वा ब्राह्मणो ब्रह्मविद् कृत्यकृत्यो भवतीति।

अनेन ब्रह्मविद्यायाः साधनानि श्रवणमनननिदिध्यासनानि उक्तानि। मैत्रेयी ब्राह्मणेऽपि श्रोतव्य इत्यादिना तान्यन्तरङ्गसाधनानि प्रोक्तानि। एकस्यैव सर्वान्तरस्यात्मनः उषस्तप्रश्ने कहोलप्रश्ने च द्विःश्रवणं विशेषविवक्षया। को विशेषः, पूर्वचर्चितस्यैव सर्वान्तरस्यात्मनः अशनायादिरहितत्वम्।

एवं गार्गीप्रश्नेऽपि पृथिव्यादीनां सर्वेषां भूतानामुपादानभूतं ब्रह्मैवेति। तत्र ब्रह्मलोकेषु इत्यस्य ब्रह्मैव लोक इति ब्रह्मलोक। अयमात्मा ब्रह्म सर्वान्तरः, सर्वान्तर्यामीति तृतीये सप्तमे ब्राह्मणे उद्दालकारुणि प्रश्ने व्युत्पादितम्। यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। इत्येवमादिना मन्त्रग्रामेण सर्वभूतशरीरः सर्वभूतेभ्यो पृथक् विलक्षणः तदनन्तरं तद् यमयति य एष आत्मा स अन्तर्यामी स चामृत इति। एक एव आत्मा अन्तर्यामित्वेन व्याख्यातः।

अदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ता अविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽनोस्ति श्रोतेत्यादि मन्त्रेण अन्तर्याम्यमृतात्मातिरिक्तस्य कस्यचित् श्रवणादि कर्तुः प्रतिषेधाद् आत्मैक्यं प्रतिपादितं भवति।

तृतीयाध्यायेऽष्टम ब्राह्मणे पुनर्गार्गी प्रश्ने सर्वं भूतं भवद्भविष्यच्चाकाशे ओतं प्रोतमित्युत्तरितम्। तदाकाशमपि अक्षरे ब्रह्मणि परमात्मनि ओतं प्रोतञ्च। तच्चाक्षरं ब्रह्म किं स्वरूपमिति तत्राह–अस्थूलमनण्वह्रस्वमदीर्घमलोहितम–स्नेहमच्छायमतमोऽवाय्यनाकाशमित्यादि वाक्येन सर्वनिषेधशेषं ब्रह्मेति प्रतिपादितम्। तस्यैव अक्षरस्य व्यापकस्य अविनाशिनः ब्रह्मणः प्रशासने सर्वं विश्वं यथावत् प्रवर्तते। एवमस्यात्मनः एकत्वमद्वैतञ्च तृतीयाध्याये वह्वीभिरूपपत्तिभिः प्रतिपादितम्। चतुर्थाध्याये तृतीये ज्योतिर्ब्राह्मणे किं ज्योतिरयं पुरुष इति जनकेन क्रमशः पृष्टो ब्रह्मविद्याचार्यो याज्ञवल्क्य आदित्यादिज्योतिः क्रमेण स्वयं ज्योतिरात्मेत्युक्तवान्। उपशान्तेषु च सर्व-ज्योतिषु आत्मैवास्य ज्योतिरित्यात्मनैव ज्योतिषास्ते इत्यादि वाक्येन। अस्यात्मनः स्वयं ज्योतिष्ट्वमुक्तवान्।

तत्रैव सप्तममन्त्रे कतम आत्मेति पृष्टःसन् आचार्य आह–योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीव स हि स्वप्नोभूत्वा इमं लोकमतिक्रामति मृत्यो रूपाणि विज्ञानमय बुद्धौ उपलब्धः हृदि हृदयदेशे अन्तः ज्योतिः पुरषः उभौ लोकौ स्वप्नं जाग्रत् चानुसञ्चरति। सः इन्द्रियादि सम्पर्कात् ध्यायतीव लेलायतीव स्वयं निष्क्रियः सन् इत्यर्थः।

**गीतायामप्युक्तं–**यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः। क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत (गी. 13/33)। यदादित्यगतं तेज इत्यादि च (गी. 15/12)। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीत्यादि श्रुतेश्च (कठ. 5/15)।

एवमग्रे सुषुप्तिवर्णनेनास्यात्मनः स्वरूपमुक्तम्–यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति"। न च तत्र सुषुप्तावस्थो विनश्यति। नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादित्याह श्रुतिः। न तु तद्द्वितीयमस्ति ततोऽन्यद् विभक्तं पश्येदिति द्वैतं प्रतिषिध्यते।

एवं संक्षेपेणेह प्रबन्धे ब्रह्मात्मैक्यं निरूपितम् खिलकाण्डेऽपि सोपहितस्य ब्रह्मण उपासनादिविहितमिति तत्रापि आत्मतत्त्वमुपदिष्टमेवेति वेदितव्यम्।